National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 249-252
© 2025 NJHSR
www.sanskritarticle.com

**कल्पना मुर्म्मू**
शौधच्छात्रा, साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

.

**Correspondence:**
**कल्पना मुर्म्मू**
शौधच्छात्रा, साहित्य विभागः,
राष्ट्रीय संस्कृत विश्वविद्यालयः,
तिरुपतिः

# भासरूपकेषु चर्चित राजपरिवारव्यवस्था

**कल्पना मुर्म्मू**

***सारांशः -*** *परिवारः शब्दोऽयं "परि" उपसर्गपूर्वकं "वृ" धातुना सह घञ् प्रत्ययेन निष्पद्यते। यस्य शाब्दिकार्थं भवति समूहं संगठनं वा। परिव्रियते अनेन अर्थात् येन समूहेन मानवाः परिव्रियते तद् भवति परिवारमिति।*

*समाजस्य मूलाधारं भवति अयं परिवारः। बहुसंख्यकान् परिवारान् एकत्रे मिलित्वा निर्मीयते अस्माकं वृहत्समाजः। यस्मिन् क्षेत्रे स्व-आत्मीयजनाः मिलित्वा तिष्ठति तत्क्षेत्रं परिवार इत्युच्यते। वंश-वर्द्धनाय स्त्री-पुरुषाणां यौनसम्बन्धेन सन्तानोत्पत्तिः, सन्तानानां संरक्षणं, पालन-पोषणं तथा सामाजिकविकासार्थम् उपयुक्त-पृष्ठभूमेः निर्माणं अस्मिन् परिवारे एव क्रियते। गार्हस्थ्यजीवने स्त्री-पुरुषाणां सहवास-नियोजनं, आर्थिकस्थायित्वकरणार्थं समुचितायस्य व्यवस्थाकरणं तथा वैयक्तिक-सामाजिक-राजनैतिक-सांस्कृतिक-आध्यात्मिकादिनां विकासः एतद् परिवारनामक संस्थायामेव संघट्यन्ते।*

*भासविरचित नाटकसमूहे परिवारस्य भागद्वयं दृश्यते। यथा- राजपरिवारः सामान्यपरिवारश्च। सम्मान-प्रतिष्ठा-धनैश्वर्य-सुख-समृद्धि-वैभवतादिकारणेन राजपरिवारमयं समाजे विशेषरूपेण समाद्रियते।*

**कूटशब्दाः –** राजपरिवारः, राजप्रासादः, राज्याभिषेकः, सपरिवारः, शिक्षाग्रहणं, पारिवारिकसम्बन्धः।

**राजपरिवारः –**

राज्ञः परिवारः राजपरिवारः। अर्थात् राज्ञः सम्बन्धीय-जनाः राजपरिवारस्य अन्तर्भुक्तं भवन्ति। तदानीन्तनसमाजे राजपरिवारस्य विशिष्टमेकं स्थानमासीत्। अस्मिन् राजपरिवारे न केवलं सामान्य-दैनन्दिनजीवनस्य प्रत्येकसामग्रीमुपलभ्यते अपि तु सम्पूर्ण-भोगविलासयुक्ता जीवनधारा तत्र प्रचलिता आसीत्। भासविरचितम् अभिषेक-नाटके रावणस्य वचने भोगविलासस्य चित्रं प्रकाश्यते-

**अपास्य भोगान् मां चैव श्रियं च महतीमिमाम्।**
**मानुष्ये न्यस्तहृदया नैव वश्यत्वमागता।**[1]

तत्काले कनक-सुवर्ण-प्रबाल-नीलकान्तमण्यादिद्वारा निर्मितानि राज-प्रासादानि इन्द्रपुरी सदृशैव गगने सुशोभ्यन्ते। यतो हि अभिषेक-नाटके लङ्कां प्रविश्य महावीरहनुमन्तः रावणस्य आश्चर्यजनकभवनस्य वर्णनावसरे उक्तं यत्-

**अहो रावणभवनस्य विन्यासः।**

**कनकरचितचित्रतोरणाढ्या मणिवरविद्रुमशोभितप्रदेशा।**
**विमलविकृतसञ्चितैर्विमानैर्वियति महेन्द्रपुरीव भाति लङ्का।**[2]

एवंरूपेण अतिसमृद्धिपूर्ण-सुविशालराजभवने तु राजपरिवाराः अतिसुखमयं जीवनयापनं कुर्वन्ति। राजा एवं तस्य परिवारजनाः यत्र कुत्रापि गच्छन्समये परिचारक-गणाः अङ्गरक्षकरूपेण सर्वदा तैः साकं गमनागमनं कुर्वन्ति। यतो हि प्रतिज्ञायौगन्धरायण-नामके नाटके राजा प्रद्योतमहासेनेन सह साक्षात्समये देवी(राणी) अपि सपरिवारेण सह प्रविशति- **"ततः प्रविशति देवी सपरिवारा"**।[3]

पुनः अभिषेक-नाटके रावणोऽपि सीतया सह साक्षात्कारसमये सपरिवारेण साकं प्रविशति- **"ततः प्रविशति रावणः सपरिवारः"**।[4]

राजपरिवारे राजपरम्परानुसारेण महाराजा वृद्धावस्था प्राप्स्यनन्तरं राजपुत्रस्य राज्याभिषेकं कृत्वा एवं राज्यभारं तस्य हस्ते दत्त्वा वृद्धावस्थां तपोवने अतिवाहितं करोति स्म। अस्मिन् विषये प्रतिमा नाटके महाराजा दशरथेन उक्तं यत्-

**राज्ये त्वामभिषिच्य सन्नरपतर्लाभात् कृतार्थाः प्रजाः**
**कृत्वा, त्वत्सहजान् समानविभवान् कुर्वात्मनः सन्ततम्।**
**इत्यादिश्य च ते, तपोवनमितो गन्तव्यमित्येतया**
**कैकेय्या हि तदन्यथा कृतमहो निःशेषमेकक्षणे।।**[5]

अस्मिन् राज्याभिषेकानुष्ठाने सर्वप्रथमम् आचार्य-मन्त्री-मित्र-पुरोहित-पुरोवासिगण-एतेषां सर्वेषामुपस्थित्यां लघ्वायोजितसमारोहे राजा राजपुत्रं स्वाङ्कमारोप्य अतिस्नेहेन राज्यभारं प्रस्तावयति। अस्मिन् सन्दर्भे प्रतिमा-नाटकस्य प्रथमाङ्के वर्ण्यते यत्-

**“रामः – श्रूयताम् अद्यास्मि महाराजेनोपाध्यायामात्य-**
**प्रकृतिजनसमक्षमेकप्रकारसङ्क्षिप्तं कोसलराज्यं कृत्वा**
**बाल्याभ्यस्तमङ्कामारोप्य मातृगोत्रं स्निग्धमाभाष्य पुत्र!**
**राम! प्रतिगृह्यतां राज्यम्”।**[6]

तदनन्तरं राजपुत्रस्य मौनस्वीकृतेन राज्याभिषेकानुष्ठानमारभ्यते। कार्यारम्भस्य प्रारब्धे राजा स्वयं छत्रं गृह्णाति- **छत्रे स्वयं नृपतिना रुदता गृहीते।**[7]

तत्परं राजपुत्रस्य हस्ते मङ्गलसूत्रं बन्धनं कृत्वा त्वं भद्रासने अधिष्ठाप्यते-

**येनाहं कृतमङ्गलप्रतिसरो भद्रासनारोपितो-**
**ऽप्यम्बायाः प्रियमिच्छता नृपतिना भिन्नाभिषेकः कृतः।**[8]

दर्भ-कुश-पुष्पादिद्वारा प्रस्तुतं तीर्थोदकेन परिपूर्ण-हेममयघटेन अभिषेकमिदं संस्कारं सम्पाद्यते- **न्यस्ता हेममयाः सदर्भकुसुमा-स्तीर्थाम्बुपूर्णा घटाः।**[9]

सर्वदिशायां राज्याभिषेकानुष्ठानस्यानन्दाय पटाहादिमङ्गलवाद्यं श्रूयते- **“आरब्धे पटहे”।**[10]

अभिषेकात्परं नृप-शब्देन अभिहितं तस्य शिरसि प्रकाशमानमुकुट-धारणं कारयति, प्रजाजनाः सहर्षेण तस्य जयध्वनिं कुर्वन्ति एवं सर्वे नव-महाराजम् अभिनन्दयन्ति-

**अधिगतनृपशब्दं धार्यमाणातपत्रं**
**विकसितकृतमौलिं तीर्थतोयाभिषिक्तम्।**
**गुरुमधिगतलीलं वन्द्यमानं जनौघै-**
**र्नवशशिनमिवार्यं पश्यतो मे न तृप्तिः।**[11]

बन्धुजनाः अनुचरगणाश्चापि नवाभिषिक्तं महाराजम् अभिनन्दनं ज्ञापयन्ति।[12]राज्याभिषेकानुष्ठानस्यावसरेमनोविनोदनाय सामयिका-भिनयानुष्ठानं आयोज्यते।[13] एवं प्रकारेण विशालायोजनानुसारेण राज्याभिषेकानुष्ठानं सम्पादनं क्रियते यस्य सार्थकता विद्यते प्रजारक्षणायैव।

राजपरिवारे प्रधानरूपेण विद्यमानमासीत् राजा। राज्ञः सुष्ठपरि-चालनेन एव सम्पूर्णराज्यव्यवस्था सुशृङ्खलितरूपं प्राप्नोति। तस्य आज्ञा सर्वमान्यमस्ति। राजपुत्रमपि तस्य आदेशपालनं कर्त्तुं सर्वदा तत्परं भवति। परिलक्ष्यते यथा प्रतिमानाटके श्रीरामः पितुः प्रतिज्ञापालनार्थं वल्कलं धृत्वा वनवासं प्रति गच्छति स्म-

**मङ्गलार्थेऽनया दत्तान् वल्कलांस्तावदानय।**
**करोम्यन्यैर्नृपैर्धर्मं नैवाप्तं नोपपादितम्।**[14]

राजपरिवारे नारीणां पुरुषाणाञ्च कृते शिक्षाव्यवस्था प्रचलिता आसीत्। राजपुरुषाः स्वकीय-रुच्यनुसारं पृथग्पृथग्विषये शिक्षाग्रहणं कुर्वन्ति। अस्य सुस्पष्टोल्लेखं दृश्यते प्रतिज्ञायौगन्धरायणनाटकस्य द्वितीयाङ्के-

**अर्थशास्त्रगुणग्राही ज्येष्ठो गोपालकः सुतः।**
**गान्धर्वद्वेषी व्यायामशाली चाप्यनुपालकः।**[15]

तत्कालीनयुगे राजपरिवारे राजान्तःपुरीय कन्यानां कृतेऽपि शिक्षा-ग्रहणस्य समुचितव्यवस्था प्रचलिता आसीत्। यथा हि प्रतिज्ञायौगन्धरायण-नाटके वासवदत्ता स्वाभिरुच्यनुसारं वीणां शिक्षितुम् उत्तरा नाम्ना वैतालिकायाः सकाशे गच्छति स्म-

**“राजा- वासवदत्ता क्व ?**
**देवी- उत्तराया वैतालिक्याः सकाशे वीणां शिक्षितुं**
**नारदीयां गतासीत्”।**[16]

जीवनस्य अति प्रयोजनीय-सिद्धान्तनिर्णयक्षेत्रे नारीणां परामर्शमपि तत्कालीनसमाजे समाद्रियते। तदर्थं प्रतिज्ञायौगन्धरायणनाटके दुहितुः विवाहविषये चिन्तितेन महाराज्ञा महासेनेन परामर्शयितुं महाराणीं आह्वयते-

**“दुहितुः प्रदानकाले दुःखशीला हि मातरः।**
**तस्माद् देवीं तावदाहूयताम्”।**[17]

तदानीन्तकाले सामान्यगृहस्थजनानां सदृशैव राजाऽपि स्वकीय-कन्यायाः विवाहविषये चिन्तितमासीत्, इत्यस्य परिचयं प्रतिज्ञा-यौगन्ध-रायणनाटकस्य द्वितीयाङ्के प्रकटीयते-

**“राजा- अतः खलु चिन्त्ये”।**[18]
**कन्याया वरसम्पत्तिः पितुः प्रायः प्रयत्नतः।**
**भाग्येषु शेषमायत्तं दृष्टपूर्वं न चान्यथा।**[19]

तस्मिन् काले समाजव्यवस्थायां नारीभ्यः पर्दा-प्रथा प्रचलिता आसीत्। परन्तु कन्या दर्शनं सर्वदा निर्दोषमिति विधीयते। एवं अनावृत-शिविकायामुपविश्य राजकुमारी देवपूजनार्थं गतासीत्।[20]

राजपरिवारस्य अन्यतममेकं वैशिष्ट्यमस्ति अतिथिसत्करामिति। स्वप्नवासवदत्तनाटकस्य प्रथमाङ्के कञ्चुकीयेन आगत ब्रह्मचारीं प्रति-

**“प्रतिगृह्यतामतिथिसत्कारः”।**[21]

इति वचनेन अतिथिसत्कारस्य भावना प्रकटीयते।

पुनः प्रतिमा नाटकस्य पञ्चमाङ्के यदा रावणेन अतिथिवेशेन रामाश्रमे प्रवेश्यते तदा रामेन अति शुद्धभावनया तस्य अतिथिसत्कारं क्रियते।[22]

पुनश्च अभिषेकनाटके रावणस्य भ्राता विभीषणः रामस्य शरणे आगमनात्परं रामः स्वयं लक्ष्मणमादिशति-

**"वत्स लक्ष्मण! गच्छ, सत्कृत्य प्रवेश्यतां विभीषणः"।**[23]

प्रतिज्ञायौगन्धरायणनाटके महासेनस्यादेशेन कञ्चुकीद्वारा वत्सराज-उदयनस्य राजकुमारोचित-अतिथिसत्कारस्य प्रसङ्गमुल्लेख्यते-

**"गच्छ। भरतरोहकं ब्रूहि – कुमारविधिविशिष्टेन सत्कारेण**

**वत्सराजमग्रतः कृत्वा प्रवेश्यताममात्य इति"।**[24]

पुनः पञ्चरात्रनाटकस्य द्वितीयाङ्के राजाविराटयुधिष्ठिरयोः मध्ये वार्तालापसमये विराटेन अतिथिं पूजार्हमिति कथ्यते-

**पूजार्होऽप्यतिथिर्भवेत् स्वविभवैरिष्टा हि नः पाण्डवाः।**[25]

मध्यमव्यायोगे भीमद्वारा वृद्धब्राह्मणस्य परिवारं रक्षणात्परं भीमेन तान् स्वाश्रमं प्रति आगमनाय कथ्यते एवं आतिथ्यस्वीकृत्य विश्रम्य च सुखपूर्वकं गन्तव्यमिति भाष्यते।[26]

भासनाटकचक्रे राजपरिवारस्य यत् पारिवारिकसम्बन्धं वर्ण्यते तदग्रे क्रमशः आलोच्यते-

दूतघटोत्कचनाटके कौरवसभागृहे दूतरूपेण आगतः हिडिम्बापुत्रः घटोत्कचः यदा धृतराष्ट्रं पितामहः इत्युक्त्वा अभिवादयति स्म तदा तस्य मनसि स्मर्यते यत् आदौ युधिष्ठिरादिगुरुजनानामभिवादनं निवेदनीयं तत्परं स्वाभिवादनं करणीयमिति-

**"पितामह! अभिवादये घटोत्क--(इत्यर्धोक्ते) न न अयमक्रमः।**

**युधिष्ठिरादयश्च मे गुरवो भवन्तमभि-**

**वादयन्ति। पश्चाद्धटोत्कचोऽहमभिवादये"।**[27]

घटोत्कचस्य एतत्व्यवहारेण परिवारस्य सदस्यानां सम्बन्धमत्यन्तं मधुरं सम्मानीयञ्चासीत् एतत् स्पष्टायते।

पारिवारिकसम्बन्धविषये पुत्रं प्रति पित्रुपदेशात्मकस्यैकोद्धरणमपि ऊरुभङ्गम् इति नाटके दृश्यते। तत्र रणभूम्यां दूर्योधनस्य ऊरुभङ्गात्परं तस्य माता-पिता-रानी-पुत्रश्च तं दर्शनार्थम् आगच्छन्ति स्म। तस्मिन् समये आघातप्राप्त-दूर्योधनेन मातरं पितरञ्च अभिवादयते, पत्नीः सान्त्वनां दीयते एवं पुत्रस्य कृते उपदेशस्वरूपं उच्यते यत्- पाण्डवान् सेवनीयाः, मातुः कुन्त्याः आदेशादि पालनीयाः, अभिमन्योः माता सुभद्रा तथा द्रौपदी चोभे मातृवत् पूजयितव्यमिति-

**"राजा- अहमिव पाण्डवाः शुश्रूषयितव्याः**

**तत्रभवत्याश्चाम्बायाः कुन्त्या निदेशो वर्तयितव्यः।**

**अभिमन्योर्जननी द्रौपदी चोभे मातृवत्पूजयितव्ये"।**[28]

तत्रैव दुर्योधनेन कथितः- **"धृता बान्धवाः"।**[29] इति वचनेन एतत् स्पष्टायते यत् सम्बन्धिनः दूर्योधनस्याश्रये शोषिताः यत् कारणेन तेऽपि सन्तुष्टिं प्राप्य समयानुसारं परिवारस्य कृते सहयोगितां कुर्वन्ति स्म।

सुव्यवस्थित-राज्यपरिचालनाय राजाधीने विविधक्षेत्रे वहवः सेवकाः नियुक्तास्सन्ति। अस्मिन् क्षेत्रे स्त्रियः पुरुषः च तेभ्यः निर्धारितानि पृथग् पृथग्कार्याणि कुर्वन्ति। श्रृङ्गार-अर्थ-सन्देशादि क्षेत्रे तथा राज्ञः व्यक्तिगतप्रयोजनाय च ते सहायतां कुर्वन्ति।

राज्यस्य शासनव्यवस्था सुपरिचालनाय मन्त्रीणाममात्यानां भूमिका अनस्वीकार्यं भवति। शासनकार्यसम्बन्धितं तथा युद्धविग्रह-सम्बन्धितविषये राज्ञा अमात्यैः सह परामर्शयित्वा एव निर्णीयते। यतो हि अभिषेकनाटके मन्त्रीवर्गेण सह मन्त्रयित्वा गन्तव्यमिति तारा वालीं कथयति-

**"तदमात्यवर्गेण सह सम्मन्त्र्य गन्तव्यम्"।**[30]

राजकार्यपरिचालनाय विशिष्टगुणयुक्तदूतस्य कार्यमपि विशेषोल्लेख-नीयमस्ति। मनुस्मृतौ दूतनियोगविषये वर्ण्यते यत्-

**दूतञ्चैव प्रकुर्वीत सर्वशास्त्रविशारदम्।**

**इङ्गिताकारचेष्टज्ञं शुचिं दक्ष कुलोद्भवम्।।**[31]

अर्थात् सर्वशास्त्राभिज्ञम् इङ्गिताकारचेष्टज्ञं शुद्धचरित्रयुक्तं कार्यनिपुणमेव सद्वंशजातं व्यक्तिमेव दूतकार्यस्य योग्याधिकारी भवति। पुनरपि तत्रैव सर्वेषु मानवेषु अनुरक्तः, शुद्धचरित्रयुक्तः, कार्यनिपुणः, स्मरणशक्तिसम्पन्नः तथा देशकालविषये ज्ञानवान्, रूपवान्, भयरहितः, वचने पटुः दूतैव राज्ञः प्रशंसनीयमिति-

**अनुरक्तः शुचिर्दक्षः स्मृतिमान्देशकालवित्।**

**वपुष्मान्वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते।।**[32]

कौटलीयार्थशास्त्रानुसारं दूतस्य प्रकारत्रयं वर्तते। यथा- अमात्यगुणैः युक्तः निसृष्टार्थः, एकचतुर्थांशयुक्तः गुणहीनः परिमितार्थः, अर्द्धगुणहीनः शासनहरः। प्राप्यते यत्-

**"अमात्यसम्पदोपेतो निसृष्टार्थः।**

**पादगुणहीनः परिमितार्थः।**

**अर्द्धगुणहीनः शासनहरः"।**[33]

दूतवाक्यनाटके श्रीकृष्णः निसृष्टार्थदूतस्यान्तर्गतमस्ति। तत्र वासुदेवेन स्वयं कथ्यते यत्-

**"अद्य खलु धर्मराजवचनाद् धनञ्जयाकृत्रिममित्रतया**

**चाहवदर्पमनुक्तग्राहिणं सुयोधनं प्रति मयाप्यनुचित-**

**दौत्यसमयोऽनुष्ठितः"।**[34]

अस्मिन् नाटके वासुदेवेन स्वयं दूतरूपेण दुर्योधनस्य सभायां गत्वा युधिष्ठिरस्य सन्देशम् उपस्थाप्यते। एवं दुर्योधनस्य तत् प्रस्तावम् अस्वीकरणात्परं श्रीकृष्णकर्तृक दुर्योधनम् अवबोधनं तथा स्ववाक्कुशलेन समस्या समाधयितुं प्रचेष्टां क्रियते।

पुनः दूतघटोत्कचनाटके घटोत्कचं दूतरूपेण दृश्यते। अत्र घटोत्कचः परिमितार्थः। दूतोऽयम् अवध्यं भवति। यतो हि दूतघटोत्कचम् नाटके उल्लेख्यते यत्-

**दूतः खलु भवान् प्राप्तो न त्वं युद्धार्थमागतः।**
**गृहीत्वा गच्छ सन्देशं न वयं दूतघातकाः।।**[35]

पुनः दूतघटोत्कचनाटके दुर्योधनेन दूतरूपं घटोत्कचं निर्भयतापूर्वकं श्रीकृष्णस्य सन्देशं श्रावयितुं कथ्यते-

**एह्येहि प्रविशस्व शत्रुभवनं कौतुहलं मे महत्।**
**धृष्टं श्रावय मां जनार्दनवचो दुर्योधनोऽहं स्थितः।।**[36]

**निष्कर्षः –**

एवं रूपेण भासनाटकचक्रे बहुत्र राजपरिवारस्य यानि चित्राणि परिलक्ष्यते तदत्र मया संक्षेपेण उपस्थापिता। यथा राजपरिवारे पुरुषाणां तथा नारीणां कृते उत्तमा शिक्षाव्यवस्था, उल्लेखनीयातिथिसत्कारः, पुत्रं प्रति पित्रुपदेशः शिरोधार्यः, जीवनस्य अति प्रयोजनीय-सिद्धान्तनिर्णयक्षेत्रे नारीणां परामर्शस्य समादरः इत्यादयः।

**पादटिप्पणी-**

1 अभि.- 2/12
2 अभि., अङ्क-2, पृ.- 30, अभि.- 2/2
3 प्र.यौ., अङ्क- 2, पृ.- 53
4 अभि., अङ्क- 2, पृ.- 36
5 प्रतिमा- 2/19
6 प्रतिमा, अङ्क-1, पृ.- 20
7 प्रतिमा- 1/7
8 अभि.- 6/34
9 प्रतिमा- 1/3
10 प्रतिमा- 1/5
11 प्रतिमा- 7/12
12 प्रतिमा, अङ्क- 7, पृ.- 182-183
13 प्रतिमा, अङ्क- 1, पृ.- 8-9
14 प्रतिमा- 1/24
15 प्र.यौ.- 2/13
16 प्र.यौ., अङ्क- 2, पृ.- 54
17 प्र.यौ., अङ्क- 2, पृ.- 52
18 प्र.यौ., अङ्क- 2, पृ.- 52
19 प्र.यौ.- 2/5
20 प्र.यौ., अङ्क-3, पृ.- 96
21 स्व.वा., अङ्क-1, पृ.- 23
22 प्रतिमा, अङ्क-5, पृ.- 132-133
23 अभि., अङ्क- 4, पृ.- 87
24 प्र.यौ., अङ्क-2, पृ.- 64
25 पञ्चरा.- 2/39
26 म.व्या.- 1/51
27 दू.घ., अङ्क- 1, पृ.- 39
28 ऊरू., अङ्क-1, पृ.- 58
29 ऊरु.- 1/52
30 अभि., अङ्क- 1, पृ.- 10
31 म.स्मृ.- 7/63
32 म.स्मृ.- 7/64
33 कौ.अ., पृ.- 93
34 दू.वा., अङ्क- 1, पृ.- 24
35 दू.घ.- 1/48
36 दू.घ.- 1/34

**सन्दर्भ ग्रन्थसूची-**


- भासनाटकचक्रम्, प्रधान-सम्पादकः डॉ.सुधाकर मालवीयः, चौखम्बा कृष्णदास अकादमी, वाराणसी
- मनुस्मृतिः, चौखम्बा संस्कृत संस्थान, वारणसी, 1982


**सङ्केताक्षरसूची-**

| | |
|---|---|
| अभि. | - अभिषेकनाटकम् |
| **ऊरु.** | **- ऊरुभङ्गम्** |
| **पञ्चरा.** | **-पञ्चरात्रम्** |
| प्रतिमा. | - प्रतिमानाटकम् |
| प्र.यौ. | - प्रतिज्ञायौगन्धरायणम् |
| दू.घ. | - दूतघटोत्कचम् |
| दू.वा. | - दूतवाक्यम् |
| म.व्या. | - मध्यमव्यायोगः |
| म.स्मृ. | - मनुस्मृतिः |